# Shri Bala Patalam

# શ્રીબાલાપટલમ્

## Document Information

Text title : Shri Bala Patalam

File name : bAlApaTalam.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીબાલાપટલમ્

કૈલાસશિખરાસીનં ભગવન્તમુમાપતિમ્ ।
ચન્દ્રાર્ધમુકુટં દેવં સોમસૂર્યાગ્નિલોચનમ્ ॥ ૧॥

ગજચર્મપરીધાનં વિરૂપાક્ષં સુરાર્ચિતમ્ ।
ગણગન્ધર્વયક્ષેન્દ્રદેવાસુરનમસ્કૃતમ્ ॥ ૨॥

વિહસન્તં જપન્તં ચ પઠન્તં ચ મુહુર્મુહુઃ ।
ઉત્થાય પ્રણતા ભૂત્વા ચેદં પૃચ્છતિ ભૈરવી ॥ ૩॥

શ્રીભૈરવી -
ભગવન્ કરુણામ્બોધે સર્વાગમવિશારદ ।
ત્વત્પ્રસાદાન્મયા સર્વાઃ શ્રુતા વિદ્યાઃ સુરેશ્વર ॥ ૪॥

ઇદાનીં શ્રોતુમિચ્છામિ બાલાં ત્રિપુરસુન્દરીમ્ ।
દયાસ્તિ યદિ મે દેવ વદ વિદ્યાં મહેશ્વર ॥ ૫॥

શ્રીભૈરવઃ -
શ ૃણુ દેવિ ! પ્રવક્ષ્યામિ પઞ્ચાઙ્ગં સાધકેષ્ટદમ્ ।
પટલં પદ્ધતિં વર્મ તથા નામ્નાં સહસ્રકમ્ ॥ ૬॥

સ્તવરાજં મહાદેવિ શ ૃણુષ્વૈકાગ્રમાનસા ।
શ્રીબાલા પરમેશાની ભુક્તિમુક્તિપ્રદાયિની ॥ ૭॥

રાજ્યં દેયં શિરો દેયં ગૃહં લક્ષ્મીયુતં તથા
સર્વં દેયં મહાદેવિ ન દેયમિદમુત્તમમ્ ॥ ૮॥

અસ્યા વિદ્યાયાઃ સદૃશી વિદ્યા નાન્યા કલૌ યુગે ।
શ્રીબાલાત્રિપુરાવિદ્યા શીઘ્રં સિદ્ધિપ્રદા સ્મૃતા ॥ ૯॥

દેયા શિષ્યાય શાન્તાય ગુરુભક્તિરતાય ચ ।
નાભક્તાય પ્રદાતવ્યા વિદ્યેયં પરમેશ્વરિ ॥ ૧૦॥

મન્ત્રોદ્ધારં તથા યન્ત્રં પ્રસ્તારં ધ્યાનમેવ ચ ।
પ્રયોગાન્ સંપ્રવક્ષ્યામિ દેવદેવ્યા મહેશ્વરિ ॥ ૧૧॥

પ્રથમં શ‍ૃણુ દેવેશિ મન્ત્રોદ્ધારં ફલપ્રદમ્ ।
ગોપનીયં પ્રયત્નેન યેન સિદ્ધિઃ પ્રજાયતે ॥ ૧૨॥

વાગ્ભવં કામરાજશ્ચ શક્તિમધ્યેઽભિધં ન્યસેત્ ।
નમોઽન્તે દેવિ બાલાયા મન્ત્રોઽયં ચાષ્ટવર્ણકઃ ॥ ૧૩॥

નાપિ વિઘ્નો ન વા શૌચો ન વારનિયમસ્તથા ।
સ્વયં સિદ્ધો મહાદેવિ મન્ત્રરાજઃ કલૌ યુગે ॥ ૧૪॥

દક્ષિણામૂર્તિપઙ્ક્ત્યૌ ચ મુનિશ્છન્દઃ ક્રમાત્ સ્મૃતમ્ ।
દેવતા ત્રિપુરા બાલા આદ્યન્તે બીજશક્તિકે ॥ ૧૫॥

ક્લીં કીલકં સમાદિષ્ટં ધર્મકામાર્થમુક્તયે ।
શિરસિ વદને દેવિ હૃદયે ગુહ્યદેશકે ॥ ૧૬॥

પાદયોર્નાભિકમલે સર્વાઙ્ગે ચ તથા ન્યસેત્ ।
ઋષ્યાદિકં મહાદેવિ કુર્યાન્ન્યાસવિકલ્પનામ્ ॥ ૧૭॥

કરન્યાસં ષડઙ્ગં ચ બીજૈઃ કુર્યાન્મહેશ્વરિ ।
અસ્યા ધ્યાનં પ્રવક્ષ્યામિ સાધકાનાં હિતપ્રદમ્ ॥ ૧૮॥

રક્તામ્બરાં ચન્દ્રકલાવતંસાં સમુદ્યદાદિત્યનિભાં ત્રિનેત્રામ્ ।
વિદ્યાક્ષમાલાઽભયદાનહસ્તાં ધ્યાયામિ બાલામરુણામ્બુજસ્થામ્ ॥ ૧૯॥

ઇતિ ધ્યાત્વા મહાદેવીં જપેન્મત્રં સુસિદ્ધદમ્ ।
લક્ષત્રયં પુરશ્ચર્યાવિધૌ સાધકસત્તમઃ ॥ ૨૦॥

અથ વક્ષ્યામિ દેવેશિ યન્ત્રોદ્ધારં સુદુર્લભમ્ ।
સાધકસ્ય મહાદેવ્યા ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૨૧॥

બિન્દુત્રિકોણવસુ(રસ)કોણકનાગપત્રવૃત્તત્રયાઞ્ચિતમહીસદનત્રયં ચ
બાલાદિચક્રમિદમાર્તિહરં ગિરીશે બ્રહ્મેન્દ્રવિષ્ણુનમિતં ગદિતં મયા તે ॥

એવં વિલિખિતે યન્ત્રે પીઠશક્તીઃ પ્રપૂજયેત્ ।
ઇચ્છાજ્ઞાનક્રિયાશ્ચૈવ કામિની કામદાયિની ॥ ૨૩॥

રતી રતિપ્રિયાનન્દા મનોન્મન્યપિ ચાન્તિમા ।
પીઠશક્તીરિમા ઇષ્ટ્વા પીઠં તન્મનુના દિશેત્ ॥ ૨૪॥

વ્યોમપર્વતતાર્તીયં સદાશિવમહાપદમ્ ।
પીઠપદ્માસનાયાન્તે નમોઽન્તઃ પીઠમન્ત્રકઃ ॥ ૨૫॥

ષોડશાર્ણસ્તતો મૂર્તૌ ક્લૃપ્તાયાં મૂલમન્ત્રતઃ ।
આવાહ્ય પૂજયેદ્દેવીમુપચારૈઃ પૃથગ્વિધૈઃ ॥ ૨૬॥

દેવીમિષ્ટ્વા મધ્યયોનૌ ત્રિકોણે મતિપૂર્વકમ્ ।
વામકોણે રતિં દક્ષે પ્રીતિમગ્રે મનોભવામ્ ॥ ૨૭॥

યોન્યાં તુ વહ્નિકોણાદાવઙ્ગાનિ પરિપૂજયેત્ ।
મધ્યયોન્યાં બહિઃ પૂર્વદિક્ષુ ચાગ્રે સ્મરાનપિ ॥ ૨૮॥

બાણદેવીસ્તદ્વદેવ શક્તીરષ્ટાસુ યોનિષુ ।
સુભગાખ્યા ભગા પશ્ચાત્તૃતીયા ભગસર્પિણી ॥ ૨૯॥

ભગમાલા તથાનઙ્ગાદ્યાનઙ્ગકુસુમા પરા ।
અનઙ્ગમેખલાનઙ્ગમદનેત્યષ્ટશક્તયઃ ॥ ૩૦॥

પદ્મકેસરગા બ્રાહ્મીમુખાઃ પત્રેષુ ભૈરવાઃ ।
દલાગ્રેઽપ્યષ્ટ પીઠાનિ કામરૂપાખ્યમાદિમમ્ ॥ ૩૧॥

મલયં કૌલગિર્યાખ્યં ચૌહારાખ્યં કુલાન્તકમ્ ।
જાલન્ધરં તથૌડ્યાણં દેવકૂટમથાષ્ટમમ્ ॥ ૩૨॥

ભૂગૃહે ચ ધરાદિક્ષુ હેરુકં ત્રિપુરાન્તકમ્ ।
વેતાલમગ્નિજિહ્વં ચ કાલાન્તકકપાલિનૌ ॥ ૩૩॥

એકપાદં ભીમરૂપં મલયં હાટકેશ્વરમ્ ।
શક્રાદ્યાનાયુધૈઃ સર્વૈઃ સ્વસ્વદિક્ષુ સમર્ચયેત્ ॥ ૩૪॥

તદ્બહિર્દિક્ષુ વટુકં યોગિનીઃ ક્ષેત્રપાલકમ્ ।
ગણેશં વિદિશાસુ વૈ વસૂન્ સૂર્યં શિવં તથા ॥ ૩૫॥

(સર્વભૂતાન્ સમભ્યર્ચ્ય પૂજયેદાયુધાંસ્તથા) ।
બાલાં મધ્યે વિભાવ્યાદૌ કામેશ્વરાઙ્કમધ્યગામ્ ॥ ૩૬॥

મકારૈઃ પઞ્ચભિઃ કૌલઃ કૌલાચારપરાયણઃ ।
સમ્પૂજયેન્મહાદેવિ સાધકો મન્ત્રસાધકઃ ॥ ૩૭॥

બિન્દૌ ગન્ધાક્ષતૈઃ પુષ્પૈર્ધૂપદીપાદિતર્પણૈઃ ।

લયાઙ્ગમિદમાખ્યાતં પ્રયોગાન્ શ઼ૃણુ પાર્વતિ ॥ ૩૮॥

યાન્ વિધાય મનુઃ શીઘ્રં સિદ્ધિભાગ્ભવતિ ધ્રુવમ્ ।
સ્તમ્ભનં મોહનં ચૈવ મારણાકર્ષણે તથા ॥ ૩૯॥

વશીકારં તથોચ્ચાટં શાન્તિકં પૌષ્ટિકં તથા ।
એતત્સાધનમાચક્ષે સારભૂતં મનોઃ પ્રિયે ॥ ૪૦॥

અદેયં દેવ્યભક્તાય ગોપ્યં ગુહ્યતમઃ પશોઃ ।
૧. પ્રતિપદ્દિવસે દેવિ ! સ્નાત્વા કૃત્વાહ્નિકીં ક્રિયામ્ ॥ ૪૧॥

મધ્યાહ્ને નિર્જનં ગત્વા યથાવદયુતાવધિ ।
હોમો દશાંશતઃ કાર્યો ઘૃતપાયસબર્હકૈઃ ॥ ૪૨॥

સન્તર્પ્ય દેવતાઃ સદ્યઃ સ્તમ્ભનં જાયતે ધ્રુવમ્ ।
રાજસૂર્યેન્દુવાતાનાં દસ્યુવાદિમુખેષુ ચ ॥ ૪૩॥

૨. દર્શે સાયં શ્મશાને તુ જપેદુલૂકવિષ્ટરઃ ।
અયુતં તદ્દશાંશેન હોમં સર્પિસ્સુરાન્વિતૈઃ ॥ ૪૪॥

ભૂતાખ્યે વાસરે દેવિ ગત્વા પ્રેતાલયં નિશિ ॥ ૪૫॥

ચિતાગ્રે સઞ્જપેદ્વિદ્યાં વીરેન્દ્રઃ ષોડશાક્ષરીમ્ ।
અયુતં ચ હુનેન્મન્ત્રી ચિતાગ્નૌ ઘૃતગુગ્ગુલમ્ ॥ ૪૬॥

ચણ્ડાલકેશસહિતં મ્રિયતે રિપુરુત્કટઃ ।
૪. અષ્ટામ્યાં શુક્લપક્ષે તુ જપેદ્રહસિ સાધકઃ ॥ ૪૭॥

અયુતં મૂલવિદ્યાયા ધ્યાત્વા કાન્તાં મનોગતામ્ ।
હોમો દશાંશતઃ સર્પિર્લાક્ષાપુષ્પવતીરજઃ ॥ ૪૮॥

કરીરપૂલગોધૂમૈઃ સ્ત્રીણામાકર્ષણં ભવેત્ ।
૫. નવમ્યાં સાધકઃ સ્નાત્વા કૃત્વા કર્માહ્નિકં પ્રિયે ॥ ૪૯॥

અયુતં ઘૃતમત્સ્યાણ્ડપદ્મમુક્તૈણરોમભિઃ ।
હોમો વિધેયો વરીશૈર્વાસવો દાસતાં વ્રજેત્ ॥ ૫૦॥

૬. ચતુર્થ્યાં કૃષ્ણપક્ષે તુ જપેચ્ચન્દ્રોદયે શિવે ।
નદીતીરે મનું વીરોઽયુતં શીર્ષાસનસ્થિતઃ ॥ ૫૧॥

દશાંશેન હુનેત્તત્ર ઘૃતનીલોત્પલત્વચઃ ।

લવઙ્ગમરિચામ્લાદીન્ રિપોરુચ્ચાટનં ભવેત્ ॥ ૫૨॥

૭. પઞ્ચમ્યાં નિશિ દેવેશિ જપેદયુતસઙ્ખ્યયા ।
હુનેદ્દશાંશતઃ સર્પિર્મત્સ્યમત્સ્યાણ્ડખર્પરાન્ ॥ ૫૩॥

મહામયમહાભીતિ-મહોપદ્રવશાન્તયે ।
૮. મહાષ્ટમ્યાં નરઃ સ્નાત્વા પીઠે શ્રેષ્ઠે દશાધિકામ્ ॥ ૫૪॥

વીરો દશાઙ્ગસાહસ્રીં હુનેત્તત્ર દશાંશતઃ ।
ઘૃતખર્જૂરમૃદ્વીકા -નાઘવલ્લીદલસ્રજઃ ॥ ૫૫॥

છાગમાંસં સરક્તં ચ મહાપુષ્ટિઃ પ્રજાયતે ।
ઇદં રહસ્યમાખ્યાતં સર્વતત્ત્વનિરૂપણમ્ ॥ ૫૬॥

સર્વસ્વં મમ દેવેશિ રહસ્યં ગોપયેત્કલૌ ।
સૂર્યાદિવારેષુ જપૈર્દશસાહસ્રસઙ્ખ્યકૈઃ ॥ ૫૭॥

સર્વસિદ્ધિમવાપ્નોતિ નાત્ર કાર્યા વિચારણા ।
ઇત્યેષ પટલો દિવ્યઃ સ્નેહાત્ તવ પ્રકાશિતઃ ।
ગોપ્યાદ્ગોપ્યો ગોપ્યતરો ગોપનીયઃ સ્વયોનિવત્ ॥ ૫૮॥

ઇતિ શ્રીમદ્રુદ્રયામલાન્તર્ગતં શ્રીબાલાપટલં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

---

*Shri Bala Patalam*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*